## अध्याय :- २३ chapter-23

नारद उवाच ।।[१]

ततश्च शैलजा देवी चिक्रीड सुभगा तदा ।।
देवगंधर्व कन्या भिंर्निग किंनर संभवा:।।
मुनीनां चापि या: कन्यास्ताभि: सार्ध च शोभना ।। १

कदाचित्तथ मेरुस्थौ वासवा: पांडुनंदन ।।
सस्मार मां ययौ चाहं संस्मृतौ वासवं तदा ।। २

मां दृष्ट्वा च सहस्त्राक्ष: समुत्थायाति हर्षित: ।।
पूजयामास तां पूजां प्रतिगृह्याहमब्रुवम्[२] ।। ३

महासुर महोन्मादकालानल दिवस्पते ।।
कुशलं विद्यते कच्चिच्च नंदसि ।। ४

पृष्टस्त्वेवं मया शक्र: प्रोवाच वचनं स्मयन् ।।
कुशलस्यां कुरस्ता वत्संभूतौ[३] भुवनत्रये ।। ५

तत्फलोदय संपप्तौ तद्भवान्संस्मृतौ मुने ।।
वेत्सि सर्वमतं त्वं वै तथापि परिनोदक:[४] ६

निवृंतिं परमां[५] याति निवेद्यार्थं सुत्दन्जने ।। ७

---

१ ब' प्रतौ इत्ययं पाठ: नास्ति ।

२ अ. ब्रवं

३ ब. संभूति

४ अ. ब. तोदक:

५ ब. परमं

तद्भवांछितजां देवीं शैलेंद्रं शैलवल्लभाम् ।।
हरं संभावय वरं यन्नान्यं रोचयंति ते ।। ८

ततस्तद्वाक्यमाकर्ण्य गतोऽहं शैलसत्तमम् ।।
औषधिप्रस्थनिलयं साक्षादिव दिवस्पतिम् ।। ९

तत्र हैमे स्वयं[१] तेन महाभक्तया निवेदिते ।।
महासने पूजितोहमुपविष्टो महासुखम् ।। १०

गृहीतार्घ्यं ततो मां च[२] पप्रच्छश्लक्ष्णयागिरा ।।
कुशलं तपसः शैलः शनैः फुल्लाननांबुजः ।। ११

अहमप्यस्य तत्प्रोच्य प्रत्यवोचं गिरीश्वरम् ।।
त्वया शैलेंद्रपूर्वां वाप्यपरां च दिशं तथा ।। १२

अवगाह्य [३]स्थितवता क्रियते प्राणि[४]पालना ।।
अहो धन्योसि विप्रेंद्राः माहात्म्येन तवाचल[५] ।। १३

तपोजपव्रतस्नानैः साधयंत्वात्मनः परम् ।।
यज्ञांगसाधनैः कांश्चित्कंदादिफलदानतः ।। १४

---

१ अ. श्वरं
२ अ. "तु" पाठः ।
३ ब. स्थिति
४ ब. प्राण
५ ब. तवालच

त्वं[१] समुद्धरसि विप्रान्किमतः प्रोच्यते तव[२] ।।
अन्येऽपि जीवा बहुधात्वामुपाश्रित्य भूधरा ।। १५

मुदिताः प्रतिवर्तंते गृहस्थमिव प्राणिनः ।।
शीतमातपवर्षाश्च क्लेशान्नाविधान्सहन् ।। १६

उपाकरोषि जंतूनामेवंरूपा[३] हि साधवः ।।
किमतः प्रोच्यते तुभ्यं धन्यस्त्वं पृथिवीधरा ।। १७

कंदरं यस्य चाध्यास्ते स्वयं तव महेश्वरः ।।
इत्युक्तवति वाक्यं च यथार्थं मयि फाल्गुन ।। १८

हिमशैलस्य महिषी मेना आगाद्दिदक्षया ।।
अनुयाता दुहित्रा च स्वल्पाश्च परिचारिका[४]ः ।। १९

लज्जयान[५]तसर्वांगी प्रविवेश सदो महत् ।।
ततो मां शैलमहिषी ववंदे प्रणिपत्य सा ।। २०

वस्त्रनिर्गूढवदना पाणिपद्मम कृतांजलिः ।।
तामहं सत्यरूपाभिराशीर्भिः समवर्धयम् ।। २१

---

१ अ. प्रतौ नास्ति ।
२ अ. प्रतौ "परं" इतिस्यात् ।
३ अ. भूतानामेवंरूपा
४ अ. चारका
५ अ. ब. लज्जावन

पतिव्रता शुभाचारा सुभगा वरसूः शुभे ।।
सदा वीरवती चापि भव वंशोन्नतिप्रदे ।। २२

ततोऽहं विस्मिताक्षीं च हिमवद्गिरिपुत्रिकाम् ।।
मृदुवाण्या प्रत्यौवोचमेहि बाले ममांतिकम् ।। २३

ततो देवी जगन्माता बालभावं स्वकं मयि ।।
दर्शयंती स्वपितरं कंठे गृह्यांकमाविशत् ।। २४

उवाच वाचं[1] तां मंदं मुनिं वंदय[2] पुत्रिके ।।
मुनेः प्रसादतोऽवश्यं पतिमाप्स्यसि संमतम् ।। २५

इत्युक्ता सा ततोबाला वस्त्रांतपि हितानना ।।
किंचित्सहुकृतोत्कंपं प्रोच्य नोवाच किंचन ।। २६

ततो विस्मितचित्तोऽहमवचारविदांवरः ।।
प्रत्यवोचं पुनर्देवीमेहि दास्यामि ते शुभे ।। २७

रत्नक्रीडनकं रम्यं स्थापितं सुचिरं मया ।।
इत्युक्ता सा[4] तदोत्थाय पितुरंकात्सवेगतः ।। २८

---

१ अ. प्रतौ नास्ति ।
२ अ. नंदय
३ अ. संततं
४ अ. प्रतौ नास्ति ।

वंदमाना च मे पादौ मया नीतांकमात्मनः ।।
मन्यता तां जगत्पूज्यामुक्तं बाले तवोचितम् ।। २९

न तत्पश्यामि यत्तुभ्यं बद्भ्याक्षीः का तवोचिता ।।
इत्युक्ते मातृवात्सल्याच्छैन्द्र महिषी तदा ।। ३०

नोदयामास मां मंदमनाशीः शंकिता तदा ।।
भगवन्वेत्सि सर्वं त्वमतीतानागतं प्रभो ।। ३१

तदहं ज्ञातुमिच्छामि कीदशोऽस्याः पतिर्भवेत् ।।
श्रुत्वेति सस्मितमुखः प्राबोचं नर्मवल्लभः ।। ३२

न जातोऽस्याः पतिर्भद्रे वर्तते च कुलक्षणः ।।
नग्नोऽति निर्धनः[1] क्रोधीवृतः क्रूरोऽसर्वदा ।। ३३

श्रुत्वेति संभ्रमाविष्टो ध्वस्तवीर्यो हिमाचलः ।।
मां तदा प्रत्युवाचेदं साश्रुकण्ठो महागिरिः ।। ३४

अहो विचित्रः संसारो[2] दुर्वेद्यो महतामपि ।।
प्रवरस्त्वपि शक्त्या यो नरेषु न कृपायते[3] ।। ३५

---

१ अ. वर्धनः
२ ब. संसारै
३ ब. कृपायते

यत्नेन महता तावत्पुण्यैर्बहुविधैरपि ।।
साधयत्यामनो लोको मानुष्यमति दुर्लभम् ।। ३६

अध्रुवं तद्ध्रूवत्वे च कथंचित्परिकल्प्यते ।।
तत्रापि दुर्लभानाम समानव्रत‿चारिणी ।। ३७

साध्वी महाकुलोत्पन्ना भार्या या स्यात्पतिव्रता ।।
तत्रापि दुर्लभं यच्च तया धर्म निषेवणम् ।। ३८

सह वेदपुराणोक्तं[१] जगत्त्रय हितावहम् ।।
एतत्सुदुर्लभं यच्च तस्यां चैव प्रजायते ।। ३९

तदपत्यमपत्यार्थं संसारे[२] किल नारद ।।
एतेषां दुर्लभानां हि किंचित्प्राप्नोति पुण्यवान् ।। ४०

सर्वमेतदवाप्नोति स कोपि यदि वा न वा ।।
किंचित्केनापि हि न्यूनं संसारः कुरुते नरम् ।। ४१

अथ सांसारिको[३] दोषाः स्वकृतं यत्र भुज्यते ।।
गार्हस्थ्यं च प्रशंसंति वेदाः सर्वे/पि नारद ।। ४२

---

१ अ. देव
२ अ. प्रतौ 'संयुक्तं' इतिस्यात् ।
३ अ. ब. संसारको

नेतिकेचित्तत्र पुनः कथं ते [1]यदि नो गृही ।।
अतो धात्रा च शास्त्रेषु सुतलाभः प्रशंसितः ।। ४३

पुनश्च सृष्टिवृद्ध्यर्थं नरक त्राण्नाय च ।।
तत्र स्त्रीणां समुत्पत्तिं विना सृष्टिर्न जायते ।। ४४

सा च जातिप्रकृत्यैव कृपणा दैन्य भागिनी ।।
तासामुपरि मावज्ञा भवेदिति च वेधसा ।।
शास्त्रेषूक्तम् संदिग्धं वाक्यमेतन्महत्फलम् ।। ४५

दशपुत्रसमा कन्या दशपुत्रान्प्रवर्द्धयन् [2] ।।
यत्फलं लभते मर्त्यस्तल्लभ्यं कन्ययैक्या ।। ४६

तस्मात्कन्या पितुः [3] शोच्या सदा दुःखविवर्धिनी ।। ४७

यापिस्यात्पूर्ण सर्वार्था पतिपुत्रधनान्विता ।।
त्वयोक्तं च कृते ह्यस्यास्तद्वाक्यं मम शोकदम् ।। ४८

केन दोषेण मे पुत्री न योग्या [4]आशिषामता ।।
न जातोऽस्याः पतिः कस्माद्वतेते वा कुलक्षणाः ।। ४९

---

१ अ. प्रतौ "गृहीनो यदि" इतिस्यात् ।
२ ब. प्रवर्धयन्
३ ब. पितु
४ अ. ब. आशिषां

निर्धनश्च मुने कस्मात्सर्वेषां सर्वदः कृतः ।।
इति दुर्घटवाक्यं ते मनो मोहयतीव मे ।। ५०

इति तं पुत्र वात्सल्यात्सभार्यं[1] शोक संप्लुतम् ।।
अहमाश्वासयं वाग्भिः सत्याभिः पांडुनंदन ।। ५१

मा शुचः शैलराजत्वं हर्षस्थानेऽति पुण्यभाक् ।।
शृणु तद्वचनं मह्यं यन्मयोक्तं च ह्यर्थवत्[2] ।। ५२

जगन्माता त्वियं बाला पुत्री ते सर्वसिद्धदा[3] ।।
पुरा भवे भवद्भार्या सतीनाम्ना भवस्य या ।। ५३

तदस्याः किमहं दद्मि खेदौषमिवाल्पकः ।।
संचिंत्येति महादेव्या नाशिषं दत्तवानहम् ।। ५४

न जातोऽस्याः पतिश्श्वेति वर्तते च भवो हि सः ।।
न स जातो महादेवो भूत भव्य भवोद्भवः ।। ५५

शरण्यः शाश्वतः शास्ता शंकरः परमेश्वरः[4] ।। ५६

---

१. भार्यं..... म्" अ. प्रतौ श्लोकार्धं नास्ति ।
२ ब. हितार्थवत
३ अ. सिद्धिदा
४ ब. म्

सर्वे देवायत्पदमामनंति वेदैश्च सर्वैरपि यौन लभ्यः ।।
बह्मादि विश्वं ननु यस्य शैल बालस्य वा क्रीडनकं वदंति ।। ५७

सचामंगल्य शीलोऽपि मंगलायतनो हरः ।।
१* निर्धनः सर्वदश्वासौ वेदस्वं स्वयमेव सः ।। ५८

स च देवोऽचलः स्थाणुर्महादेवोऽजरो हरः ।।
भविष्यति पतिः सोऽस्यास्तत्किमर्थं तु शोचसि ।। ५९

२ इति श्री स्कांदे महापुराण..... हिमवदाश्वासनं नाम
त्रयोविंशोऽध्यायः ।।२३ ।।

---

* १ अ. प्रती इत्ययं पाठः नास्ति (निर्धनः.... सः )
२ अ. इति श्री स्कंदपुराणे कुमारिकाखंडे हिमददाश्वासनं ।।
ब. इति श्री स्कंद पुराणे कुमारिकाखंडे हिमददाश्वसनं त्रयोविंशोऽध्यायः ।।